# OMkAra Stotram

# ઓઙ્કારસ્તોત્રં

## Document Information

Text title : OMkArastotram

File name : OMkArastotram.itx

Category : deities_misc, ShaTka

Location : doc_deities_misc

Transliterated by : Sumedh Sathaye

Proofread by : Sumedh Sathaye

Description/comments : Tantrasara. Stotra Kusumanjali (1921) page 112

Latest update : September 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 2, 2024

*sanskritdocuments.org*

OMkAra Stotram

# ઓઙ્કારસ્તોત્રં

અકારાત્મકઃ સૃષ્ટિકર્તા સ્વયમ્ભૂરુકારાત્મકઃ પાલકશ્ચક્રપાણિઃ ।
મકારાત્મકઃ શઙ્કરઃ શં તનોતિ તમોઙ્કારમાદિસ્વરૂપં નમામિ ॥ ૧॥

અકારે સ્થિતં દેહિનાં સ્થૂલકર્મ ઉકારે સ્થિતઃ સૂક્ષ્મસદ્ભક્તિભાવઃ ।
મકારે સ્થિતં કારણં જ્ઞાનપૂર્ણં તમોઙ્કારમાદિસ્વરૂપં નમામિ ॥ ૨॥

અકારાશ્રિતં વિશ્વમૂલાશ્રયં સત્ ઉકારાશ્રિતં સર્વભૂતાન્તરં ચિત્ ।
મકારાશ્રિતઃ શુદ્ધ આનન્દકન્દસ્તમોઙ્કારમાદિસ્વરૂપં નમામિ ॥ ૩॥

અકારસ્તુ સટ્ત્વં સ્વયં બ્રહ્મસંસ્થં ઉકારો રજઃ ક્ષત્રિયે સન્નિવિષ્ટમ્ ।
મકારો વિષાં દૃશ્યતે તત્તમઃ સ્યાત્તમોઙ્કારમાદિસ્વરૂપં નમામિ ॥ ૪॥

અકારસ્તુ પાતાલલોકાખ્યકો ભૂરુકારો ભુવર્ભૂમિલોકપ્રસિદ્ધઃ ।
મકારસ્તુ સ્વઃ કથ્યતે સ્વર્ગલોકસ્તમોઙ્કારમાદિસ્વરૂપં નમામિ ॥ ૫॥

અખણ્ડં નિજં નિર્ગુણં નિર્વિકલ્પં વિભું વ્યાપકં સર્વવેદાદિમૂલમ્ ।
સ્મરન્મુચ્યતે પાપતાપાન્મનુષ્યસ્તમોઙ્કારમાદિસ્વરૂપં નમામિ ॥ ૬॥

ઇતિ તન્ત્રસારે ઓઙ્કારસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Sumedh Sathaye

*OMkAra Stotram*
pdf was typeset on September 2, 2024

Please send corrections to *sanskrit@cheerful.com*